# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
## सत्रान्तपरीक्षा - मार्च/एप्रिल - २०२०

| कक्षा-शास्त्री-३ | प्रश्नपत्रम् – ७ | गुणाः – ७० |
|---|---|---|
| विषयः – पुराणेतिहासः | सत्रम्- ६ षष्ठम् | समयः- ०८:०० तः ११:०० |
| दिनाङ्कः – ०३/०४/२०२० | सन्दर्भग्रन्थः – श्रीमद्भागवतमहापुराणे स्कन्ध – ९, मार्कण्डेयपुराणे - ७९ तः ९१ | |

---

### प्रथमान्वितिः (Unit 1)

गुणाः

**प्रश्नः १ अधोलिखितेभ्यः कयोश्चित् द्वयोः सन्दर्भप्रसङ्गान्वयपूर्वकं व्याख्यानं कुर्वन्तु।** १०

१ स वै मनः कृष्णपदारविन्दयोर्वचांसि वैकुण्ठगुणानुवर्णने।
करौ हरेर्मन्दिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये।।

२ सशरीरो गतः स्वर्गमद्यापि दिवि दृश्यते।
पतितोऽवाक्शिरा देवैस्तेनैव स्तम्भितो बलात्।।

३ नाधिव्याधिजराग्लानिदुःखशोकभयक्लमाः।
मृत्युश्चानिच्छतां नासीत् रामे राजन्यधोक्षजे।।

**प्रश्नः २ कस्याप्येकस्योत्तरं सविस्तरं यथाग्रन्थं लिखन्तु।** १०

१ सुकन्या-च्यवनमुनिचरितं वर्णयन्तु।

२ गङ्गावतरणप्रसङ्गः वा रामचरितं लिख्यताम्।

### द्वितीयान्वितिः (Unit 2)

**प्रश्नः ३ अधोलिखितेभ्यः कयोश्चित् द्वयोः सन्दर्भप्रसङ्गान्वयपूर्वकं व्याख्यानं कुर्वन्तु।** १०

१ श्रुत्वोर्वशीन्द्रभवने गीयमानान् सुरर्षिणा।
तदन्तिकमुपेयाय देवी स्मरशरार्दिता।।

२ ओमित्युक्ते यथाधर्ममुपयेमे शकुन्तलाम्।
गान्धर्वविधिना राजा देशकालविधानवित्।।

३ न कामयेऽहं गतिमीश्वरात्परामष्टर्धियुक्तामपुनर्भवं वा।
आर्तिं प्रपद्येऽखिलदेहभाजामन्तः स्थितो येन भवन्त्यदुःखाः।।

**प्रश्नः ४ कस्याप्येकस्योत्तरं सविस्तरं यथाग्रन्थं लिख्यताम्।** १०

१ क्षत्रियवधपुरः सरं परशुरामचरितं वर्णयन्तु।

२ ययातिदेव्यान्योश्चरितं वर्णयन्तु।

## तृतीयान्वितिः (Unit 3)

**प्रश्नः ५ अधोलिखितेभ्यः कयोश्चित् द्वयोः सन्दर्भप्रसङ्गान्वयपूर्वकं व्याख्यानं कुर्वन्तु।** १०

१ तुष्टुवुस्तां सुरा देवीं सह दिव्यैर्महर्षिभिः।
जगुर्गन्धर्वपतयो ननृतुश्चाप्सरोगणाः।।

२ संस्मृता संस्मृता त्वं नो हिंसेथाः परमापदः।
यश्चमर्त्यस्स्तवैरेभिस्त्वां स्तोष्यत्यमलानने।।

३ सा वेगेनाभिपतिता घातयन्ती महासुरान्।
सैन्ये तत्र सुरारीणामभक्षयत तद्बलम्।।

**प्रश्नः ६ कस्याप्येकस्योत्तरं सविस्तरं यथाग्रन्थं लिख्यताम्।** १०

१ भगवतीकृतो रक्तबीजवधप्रसङ्गः वर्णनीयः।

२ इन्द्रादिदेवैः कृता भगवतीस्तुतिः लिख्यताम्।

## चतुर्थान्वितिः (Unit 4)

**प्रश्नः ७ अधोलिखितप्रश्नेभ्यः दशानामेकद्विवाक्येनोत्तरं लिखन्तु।** १०

१ नवमस्कन्धे का लीला कति चाध्यायाः?

२ श्राद्धदेवमनोः पत्न्या नाम किमासीत्?

३ कुबेरस्य पिता क आसीत्?

४ शर्यातिकन्यायाः नाम किमासीत्?

५ नाभागस्य पुत्रस्य नाम किमासीत्?

६ युवनाश्वस्य पुत्रनाम किमासीत्?

७ सगर इत्यस्य कोऽर्थः?

८ पुरुरवसः विवाहः कया साकं जातः?

९ नहुषस्य कति पुत्राः? के च ते?

१० कचाय केन शापो दत्तः?

११ मार्कण्डेयपुराणे कति श्लोकाः?

१२ किन्नामः वैश्यः वर्णितोऽस्ति?

१३ चण्डमुण्डयोः वधेन देव्याः नाम किं जातम्?

१४ त्रिदशा एतस्य समासः क्रियताम्?

१५ विष्णुकर्णमलोद्भूतौ कौ आस्ताम्?

**************************